# Shri Datta Hridaya Stotram

# શ્રીદત્તહૃદયસ્તોત્રમ્

## Document Information

Text title : dattAtreyahRRidaya

File name : dattAtreyahRRidaya.itx

Category : hRidaya, deities_misc, dattatreya

Location : doc_deities_misc

Transliterated by : Dutta Prasad Sharma duttaprasadsharma at gmail.com

Proofread by : Dutta Prasad Sharma duttaprasadsharma at gmail.com, NA

Source : Dattatreya Kalpa

Latest update : June 8, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

Shri Datta Hridaya Stotram

# શ્રીદત્તહૃદયસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।

અથ શ્રીદત્તહૃદય પ્રારમ્ભઃ ।
શ્રીપાર્વત્યુવાચ -
દેવ શઙ્કર સર્વેશ ભક્તાનામભયપ્રદ ॥

વિજ્ઞપ્તિં શ‍ૃણુ મે શમ્ભો નરાણાં હિતકારણમ્ ॥ ૧॥

ઈશ્વર ઉવાચ -
વદ પ્રિયે મહાભાગે ભક્તાનુગ્રહકારિણિ ॥ ૨॥

પાર્વત્યુવાચ -
દેવદેવસ્ય દત્તસ્ય હૃદયં બ્રૂહિ મે પ્રભો ॥

સર્વારિષ્ટહરં પુણ્યં જનાનાં મુક્તિમાર્ગદમ્ ॥ ૩॥

ઈશ્વર ઉવાચ -
શ‍ૃણુ દેવિ મહાભાગે હૃદયં પરમાદ્ભુતમ્ ॥ ૪॥

અસ્ય શ્રીદત્તાત્રેયહૃદયસ્તોત્રમન્ત્રસ્ય,
શ્રીભગવાન્ ઈશ્વરો ઋષિઃ, અનુષ્ટુપ્ છન્દઃ,
શ્રીચિત્સ્વરૂપી દત્તાત્રેયો દેવતા,
ૐ બીજં, હ્રીં શક્તિઃ, ક્રૌં કીલકમ્,
(મમાભીષ્ટ) દત્તપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

અથ કરન્યાસઃ ।
ૐ દ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ દ્રીં તર્જનીભ્યાં નમઃ ।
ૐ દ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ દ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ દ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।

ૐ દ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અથ અઙ્ગન્યાસઃ ।
ૐ દ્રાં હૃદયાય નમઃ ।
ૐ દ્રીં શિરસે સ્વાહા ॥

ૐ દ્રૂં શિખાયૈ વષટ્ ॥

ૐ દ્રૈં કવચાય હું ॥

ૐ દ્રૌં નેત્રત્રયાય વૌષટ્ ॥

ૐ દ્રઃ અસ્ત્રાય ફટ્ ॥

ૐ ભૂર્ભુવઃ સ્વરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્ ।
બાલચન્દ્રસુશુભે ચ કિરીટે પુષ્પહારમણિયુક્તવક્ષકમ્
પીતવસ્ત્રપરિશોભિતમધ્યં પ્રણમામ્યનુસુયોદ્ભવદત્તમ્ ॥ ૧॥

દત્તં સનાતનં નિત્યં નિર્વિકલ્પં નિરામયમ્ ।
હરિં શિવં મહાદેવં સર્વભૂતોપકારકમ્ ॥ ૨॥

નારાયણં મહાવિષ્ણું સર્ગસ્થિત્યન્તકારિણમ્ ।
નિરાકારં ચ સર્વેશં કાર્તવીર્ય વરપ્રદમ્ ॥ ૩॥

અત્રિપુત્રં મહાતેજં મુનિવન્દ્યં જનાર્દનમ્ ।
દ્રામ્બીજં વરદં શુદ્ધં હ્રીં બીજેન સમન્વિતમ્ ॥ ૪॥

શરણ્યં શાશ્વતં યુક્તં માયયા ચ ગુણાન્વિતમ્ ।
ત્રિગુણં ત્રિગુણાતીતં ત્રિયામાપતિમૌલિકમ્ ॥ ૫॥

રામં રમાપતિં કૃષ્ણં ગોવિન્દં પીતવાસસમ્ ।
દિગમ્બરં નાગહારં વ્યાઘ્રચર્મોત્તરીયકમ્ ॥ ૬॥

ભસ્મગન્ધાદિલિપ્તાઙ્ગં માયામુક્તં જગત્પતિમ્ ।
નિર્ગુણં ચ ગુણોપેતં વિશ્વવ્યાપિનમીશ્વરમ્ ॥ ૭॥

ધ્યાત્વા દેવં મહાત્માનં વિશ્વવન્દ્યં પ્રભું ગુરુમ્ ।
કિરીટકુણ્ડલાભ્યાં ચ યુક્તં રાજીવલોચનમ્ ॥ ૮॥

ચન્દ્રાનુજં ચન્દ્રવક્ત્રં રુદ્રં ઇન્દ્રાદિવન્દિતમ્ ।

અનુસૂયાકલત્રં ચ દિનેશમમરાધિપમ્ ॥ ૯॥

યોગીશ દેવદેવેશ અબ્જજન્માદિવન્દિત ।
નારાયણ વિરૂપાક્ષ દત્તાત્રેયા નમોઽસ્તુ તે ॥ ૧૦॥

અનન્ત કમલાકાન્ત ઔદુમ્બરસ્થિત પ્રભો ।
નિરઞ્જન મહાયોગિન્ દત્તાયેત્ર નમોઽસ્તુ તે ॥ ૧૧॥

મહાબાહો મુનિમણે સર્વવિદ્યાવિશારદ ।
સ્થાવરં જઙ્ગમાનાં ચ દત્તાત્રેય નમોઽસ્તુ તે ॥ ૧૨॥

ઐંદ્યાં ત્રાતુ મહાવીર્યો વન્હ્યાં પ્રણવપૂર્વકમ્ ।
યામ્યાં દત્તાત્રયો રક્ષેન્નૈરૃત્યાં ભક્તવત્સલઃ ॥ ૧૩॥

પ્રતીચ્યાં પાતુ યોગીશો યોગિનાં હૃદયે સ્થિતઃ ।
આનિલ્યાં વરદઃ શમ્ભુઃ કૌબેર્યાં જગતઃ પ્રભુઃ ॥ ૧૪॥

એકાક્ષરો મહામન્ત્રઃ સર્વમન્ત્રેષુ વિશ્રુતઃ ।
અષ્ટાક્ષરઃ સર્વસિદ્ધિઃ સર્વતન્ત્રેષુ ગોપિતઃ ॥ ૧૫॥

ઈશાન્યાં પાતુ મે રામો ઊર્ધ્વં પાતુ મહામુનિઃ ।
ષડક્ષરો મહામન્ત્રઃ પાત્વધસ્તાજ્જગત્પિતા ॥ ૧૬॥

એવં પઙ્ક્તિદશો રક્ષેદ્યદુરાજવરપ્રદઃ ।
અકારાદિક્ષકારાન્તં સદા રક્ષેદ્વિભુઃ સ્વયમ્ ॥ ૧૭॥

આદિનાથસ્ય દત્તસ્ય હૃદયં સર્વકામદમ્ ।
દત્તં દત્ત પુનર્દત્તં યોવદેદ્ભક્તિસંયુતઃ ॥ ૧૮॥

તસ્ય પાપાનિ સર્વાણિ ક્ષયં યાન્તિ ન સંશયઃ ।
યા ઇદં પઠતે નિત્યં હૃદયં સર્વકામદમ્ ॥ ૧૯॥

પિશાચશાકિનીભૂતાડાકિની શાકિની તથા ।
બ્રહ્મરાક્ષસવેતાલા ઝોટિઙ્ગા બાલભૂતકાઃ ॥ ૨૦॥

ગચ્છન્તિ પઠનાદ્દેવિ નાત્ર કાર્યા વિચારણા ।
અપવર્ગપ્રદં સાક્ષાત્ મનોરથપ્રપૂરકમ્ ॥ ૨૧॥

એકવારં દ્વિવારં ચ ત્રિવારં ચ પઠેન્નરઃ ।
જન્મમૃત્યું ચ દુઃખં ચ સુખં પ્રાપ્નોતિ ભક્તિમાન્ ॥ ૨૨॥

ગોપનીયં પ્રયત્નેન જનનીજારવત્પ્રિયે ।
નદેયં દુર્હૃદે સ્તોત્રં હૃદયાખ્યં ચ ભામિનિ ॥ ૨૩॥

ગુરુભક્તાય દાતવ્યં અન્યથા નપ્રકાશયેત્ ।
તવ સ્નેહાચ્ચ કથિત ભક્તિં જ્ઞાત્વા મયા શુભે ॥ ૨૪॥

દત્તાત્રેયસ્ય કૃપયા સભવેદ્દીર્ઘમાયુકઃ ॥ ૨૫॥

ઇતિ શ્રીરુદ્રયામલે શિવપાર્વતીસંવાદે દત્તહૃદયસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Dutta Prasad Sharma duttaprasadsharma at gmail.com

*Shri Datta Hridaya Stotram*
pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*